नाग पूजा मन्त्राः

मूल मन्त्र

ॐ नमो भगवते काम रूपिणे महाबलाय नागाधिपतये स्वाहा ॥

सर्प गायत्री

ॐ दंष्ट्रा फणाय विद्महे सुवर्ण पुन्जाय धीमहि ।
तन्नो सर्पः प्रचोदयात् ॥

नागराज गायत्री

भुजंगेषाय विद्महे सर्पजाताय धीमहि ।
तन्नो नागः प्रचोदयात् ॥

आवाहन मन्त्रः

आगच्छ अनन्त देवेष तेजोराषे जगत्पतेः ।
इमां मया कृता पूजा गृहाण पन्नगेष्वर ॥
आवाहयामि सर्पेष द्विभुजं पीत वाससं ।
वीणा पंचक संयुक्तं सर्वाभरण भूषितम् ॥

ॐ वासुकि आवाहयामि ।
ॐ तक्षक आवाहयामि ।
ॐ ऐरावत आवाहयामि ।
ॐ धनन्जय आवाहयामि ।
ॐ कर्कोटक आवाहयामि ।
ॐ यातुधान आवाहयामि ।
ॐ महानाग आवाहयामि ।
ॐ कालिक आवाहयामि ।
ॐ अनन्त आवाहयामि ॥

नाग स्तोत्र

ब्रह्म लोके च ये सर्पा: शेषनागा: पुरोगमा: ।
नमोस्तुतेभ्य: सुप्रीता: प्रसन्ना: सन्तु मे सदा ॥1॥

विष्णु लोके च ये सर्पा: वासुकि प्रमुखाश्चये ।
नमोस्तुतेभ्य: सुप्रीता: प्रसन्ना: सन्तु मे सदा ॥2॥

रुद्र लोके च ये सर्पा: तक्षक: प्रमुखास्तथा ।
नमोस्तुतेभ्य: सुप्रीता: प्रसन्ना: सन्तु मे सदा ॥3॥

खान्डवस्य तथा दाहे स्वर्गन्च ये च समाश्रिता: ।
नमोस्तुतेभ्य: सुप्रीता: प्रसन्ना: सन्तु मे सदा ॥4॥

सर्प सत्रे च ये सर्पा: अस्थिकेनाभि रक्षिता: ।
नमोस्तुतेभ्य: सुप्रीता: प्रसन्ना: सन्तु मे सदा ॥5॥

मलये चैव ये सर्पा: कार्कोट प्रमुखाश्चये ।
नमोस्तुतेभ्य: सुप्रीता: प्रसन्ना: सन्तु मे सदा ॥6॥

धर्म लोके च ये सर्पा: वैतरण्यां समाश्रिता: ।
नमोस्तुतेभ्य: सुप्रीता: प्रसन्ना: सन्तु मे सदा ॥7॥

ये सर्पा: पर्वत येषु धारि सन्धिषु संस्थिता: ।
नमोस्तुतेभ्य: सुप्रीता: प्रसन्ना: सन्तु मे सदा ॥8॥

ग्रामे वा यदि वारण्ये ये सर्पा: प्रचरंति च ।
नमोस्तुतेभ्य: सुप्रीता: प्रसन्ना: सन्तु मे सदा ॥9॥

पृथिव्यां चैव ये सर्पा: ये सर्पा: बिलसंस्थिता: ।
नमोस्तुतेभ्य: सुप्रीता: प्रसन्ना: सन्तु मे सदा ॥10॥

रसातले च ये सर्पा: अनन्तादि महाबला: ।
नमोस्तुतेभ्य: सुप्रीता: प्रसन्ना: सन्तु मे सदा ॥11॥